This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री 202

श्रीभारत्यैनमः॥ आत्मीयंचरणंदधातिपुरतोनिम्नोन्नतायांभुविस्वीयेनैवकरेणकर्षतितरोःपुष्पंश्रमाशंक
या॥तल्पेकिंचमृगत्वचाविरचितेनिद्रातिभोगैर्न्निजैरन्तःप्रेमभरालसांप्रियतमामंगेदधानोहरः॥१॥
विद्वज्जनमनोभृंगरसव्यासंगहेतवे॥ एषाप्रकाश्यतेश्रीमद्भानुनारसमंजरी २ तत्ररसेषुशृंगारस्याभ्य
र्हितत्वेनतदालंबनविभवत्वेननायिकातावन्निरूप्यते॥ साचत्रिविधा॥स्वीयापरकीयासामान्याचे
ति॥तत्रस्वामिन्येवानुरक्तास्वीया॥नचपरिणीतायांपरगामिन्यामव्याप्तिः॥अत्रपतिव्रतायाएवल
क्ष्यत्वात्।तस्याश्चपरगामितयापरकीयात्वमपिसंभवति॥अस्यास्वचेष्टाः॥भर्तुःशुश्रूषाशीलसं
रक्षणमार्जवक्षमाच।यथा।पदन्यासोगेहाद्बहिरहिफणारोपणसमोवचोलोकालभ्यंकृपणधनतु
ल्यंमृगदृशः निजावासादन्यद्भुवनमपरद्वीपतुलितंपुमानन्यःकांताद्विधुरिवचतुर्थीसमुदितः॥अ
पिच॥गतागतकुतूहलंनयनयोरपांगावधिस्मितंकुलनतभ्रुवामधरएवविश्राम्यति।वचःप्रिय
तमश्रुतेरतिथिरेवकोपक्रमःकदाचिदपिचेत्तदामनसिकेवलंमज्जति।स्वीयातुत्रिविधामुग्धामध्याप्र

Acc. No. 1979. M-1695
Title - रसमञ्जरी.
Author - भानुदास.
Date - शके 1754.
Sub - Rhetoric
folio - 17
Xerox - 34

KKSU LIBRARY RAMTEK 441 106 M-1695 Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गल्भाचेति॥ तत्रांकुरितयौवनामुग्धा।सा चाज्ञातयौवनाज्ञातयौवना चासैव च क्रमशो लज्जाभयपराधी
नरतिर्नवोढा।सैव क्रमशः संप्रश्नायाप्रश्रयसहिता विस्रब्धनवोढा॥ अस्याश्चेष्टाः क्रियाः ह्रियामनो
हराकोपमार्दवनवविभूषणेः समेता।मुग्धा यथा॥ आज्ञप्तं किल कामदेवधरणीपालेन कालं शुभे वस्ने
वास्तव्यविधिं विधास्यति तनौ तारुण्यभेरीदृशः। दृष्ट्वा खंजनचातुरीमुखरुचा सौधाधरी माधुरी वा चाकिं चसु
ध्यासमुल्लसल्लहरी लावण्यमामंत्र्यते। अज्ञातयौवना यथा।नीरानीरमुपागता श्रवणयोः सीमि विस्फुरन्ने
योः श्रोत्रलग्नमिदं किमुत्पलमिति ज्ञातुं करं न्यस्यति।सैवालांकुरशंकया शशिमुखी रोमावलीं प्रोञ्छती प्राता
स्मीति मुहुः सखीमविदितः श्रोणीभरा पृच्छति।ज्ञातयौवना यथा॥ स्वयंभूः शंभुरंभोजलोचने त्वत्पयो
धरः।नखेनाकस्य धन्यस्य चंद्रचूडो भविष्यति॥ नवोढा यथा।हस्ते धृतापि शयने विनिवेशितापि
क्रोडीकृतापि यतते बहिरेव गंतु।जानीमहे नवबधूरथ तस्य वश्यायः पारदस्थिरमतिं तु क्षमते करेण॥ वि
स्रब्धनवोढा यथा॥ दरमुकुलितनेत्रपालि नीवीनियमितबाहुकृतोरुयुग्मबंधं।करकलितकुचस्थलं न

१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वोढास्वपितिसमीपमुपेत्यकस्यसूनः। समानलज्जामदनामध्या अस्याश्रेष्टा। सागसिप्रेयसिधैर्येव
क्रोक्तिरधैर्यपरुषवाक्। यथास्वापांप्रियाननविलोकनहानिरवस्वापच्युतैप्रियकरग्रहणप्रसंगः इत्य
सरोरुहमुखीपरिचिंतयंतीस्वापविधातु मपलातुमपिप्रपेदे। पतिमात्रविषयकेलिकलापकोवि
दाप्रगल्भा। वेश्यायांकुलटायांचपतिमात्रविषयत्वाभावान्नातिव्याप्तिः। यस्यास्तुरतौप्रीतिरा
नंदात्संमोहः। तत्रप्रथमाप्रगल्भायथा॥ संस्पृशपस्तनमाकलय्यवदनंसंश्लिष्यकंठस्थलंनिष्पी
आधरविंवमंबरमापाकृष्यव्युदस्यालकं। देवस्यावुजिनीपतेःसमुदयंजिज्ञासमानेप्रियेवामाक्षीवसनं
वलैःश्रवणयोर्नीलोत्पलं ह्नुते। द्वितीयायथा। नखक्षतमुरस्थले। धरदलंचदनंव्रणंच्युतावकुलमालि
काविगलिताचमुक्तावलिः। रतांतसमयेमयासकलमेतदालोकितंस्मरतिःक्वचरतिःक्वचक्वचतव
लिशिक्षाविधिः। १० मध्याप्रगल्भेप्रत्येकंमानावस्थायांत्रिविधे। धीरा१ अधीरा२ धीराधीरा३ चेति। व्यं
ग्यकोपप्रकाशा धीरा। अव्यंग्यकोपप्रकाशा २ अधीरा व्यंग्याव्यंग्यकोपप्रकाशा धीराधीरा॥ इयांस्तुविशे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष: मध्याधीरायाः कोपस्यगोर्व्यजिका। अधीरायाः परुषवाक्। धीराधीरायायास्तुवचनैरुदितेप्रकाश
के। प्रौढाधीरायारतौदास्यं। अधीरायास्तर्जनताडनादि। धीराधीरायारतौदास्यंतर्जनताडनादिनको
पस्यप्रकाशकं। धीरादिभेदाः स्वीयायाएवनपरकीयायाइतिप्राचीनलेखनमाज्ञामात्रं। धीरात्वमधीरा
त्वमुभयवामानूनियतं। परकीयायांमानश्चैतेतेषामप्यावश्यकत्वात्। मानश्चपरकीयायामितिवक्तुम
शक्यत्वात्। मध्या धीरायथा। लीलालिपुंजव्रजतोनिकुंजेस्फारावभूवुःश्रमवारिधाराः। देहेसमी
हेभवतोविधातुंधीरंसमीरंनलिनीदलेन॥११॥ अध्याअधीरायथा। जातस्तेनिशिजागरामम पुन
र्नेत्रांबुजेशोणिमानिःपीतंभवतामधुप्रवितनंव्याप्तूर्णितंमेमनः। भ्राम्यभृंगघनेनिकुंजभवनेल[illegible]ध्वं
त्वयाश्रीफलंपंचेषुःपुनरेषमांवकुतरैःक्रूरैःशरैःकृंतति १२ मध्याधीराधीरायथा॥ कांतानुरागचतुरो
सिमनोहरोसिनाथोसिकिंचनवयौवनभूषितोसि। इथ्थंनिगघसुदृदृशावदनेप्रियस्यनिश्वस्यवाष्प
लुलितांनिहिताद्दृगंताः १३ प्रौढाधीरायथा॥नोनल्पंभजसेनजल्पसिसुधाधारानुकारागिरोदृकपातं

२

4

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुरुषेनवापरिजनेकोपप्रकाशछलात् ।इसंकेनकगर्भगौरिदयितेकोपस्यसंगोपनंन स्यादेवनचेत्पुनः
सतचरीकुर्वीतसाचिस्मितं १४ प्रौढाऽधीरायथा।प्रतिफलमवलोक्यस्वीयमिंदोः कलायाहरशिरसिप
रस्यावासमाशंकमाना।गिरिशमचलकंन्यातर्जयामासकंपप्रचलवलयवलात्कांतिभाजा
करेण १५ प्रौढाधीराधीरायथा।तल्पोपांतमुपेयुषिप्रियतमेवक्रीकृतग्रीवयाकाकुव्या
कुलवाविसाविहसितस्फूर्जत्कपोलश्रिया।हस्तन्यस्तकरेपुनर्मृगदृशालाक्षारसाक्षालितप्रोदे
पृष्ठमयस्वमांसलरुचाविस्फारितादृष्टयः १६ एतेचधीरादिभेदाः षट्ज्येष्ठाकनिष्ठाभेदेन
द्विधा।धीराज्येष्टाकनिष्ठाच।अधीराज्येष्ठाकनिष्ठाच।धीराधीराज्येष्ठाकनिष्ठाच।परिणीतत्वे
सतिभर्तुराधिकस्नेहाज्येष्ठा।परिणीतत्वेसतिभर्तुन्यूनस्नेहाकनिष्ठा।अधिकस्नेहास्यन्यूनस्ने
हासुचपरकीयासुसामान्यवनितासुचनातिव्याप्तिः।परिणीतपदेनव्यावर्तनात्।धीरा
ज्येष्ठाकनिष्ठाचयथा।एकस्मिन्शयनेसरोरुहदृशोर्विज्ञायनिद्रांतयोरेकांपल्लवितावगुंठन

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पदामुक्तंधरोद्दष्टवान् ॥ अन्यस्याः सविधंसमेत्यनिभृतव्यालोलहस्तांगुलिव्यापारैर्वसनांचलंचप
लयन्स्वापच्युतिंक्लृप्तवान् ॥१७ अधीराज्येष्ठाकनिष्ठाचयथा ॥ अंतःकोपकषायितप्रियतमेप
श्यन्घनेकाननपुष्पस्यावचयायनम्रवदानामेकांसमायोजयत् । अर्द्धोन्मीलितलोचनाच
लचमत्काराभिरामाननांस्मेराद्रीधरपल्लवांनववधूमन्यांसमालिंगति १८ धीराधीराज्ये
ष्ठाकनिष्ठाचयथा । धैर्याधैर्यपरिग्रहग्रहिलयोरेणीदृशोः प्रीतयेरत्नछद्मनतकांतिरचिरं
मुष्टिद्वयेन्यस्तवान् । एकस्याः कलयान्करप्रथमतोरत्नः परस्याः प्रियाहस्ताहस्तिमिषात्स्पृश
न्कुचतटीमानंदमाविंदति १९ अप्रकटपरपुरुषानुरागापरकीया ॥ साचद्विविधा । परोढाकन्य
काच । कन्यकायाः पित्राद्यधीनत्वात्परकीयता । अस्यागुप्तैवचेष्टा । परोढायथा । अयंरेवाकुंजः
कुसुमशरसेवासमुचितः समीरोऽयंवेलावनविदलदेलापरिमलः । इयंप्रावृट्धन्यानवजल
दविन्यासचतुरापराधीनंचेतः सखिकिममपिकर्तुंमृगयते २० गुप्ताविदग्धालक्षिताकुलटानु

३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शयानामुदितापभृतीनांपरकीयायामेवांतर्भावः। गुप्ता त्रिविधा। वृत्तसुरतगोपनाद्वर्तिष्यमाणसुरत
गोपनावृत्तवर्तिष्यमाणसुरतगोपनाच्चेति। त्रितयमपियथा। श्वश्रूःकुप्यतु विद्विषंतु सुहृदोनिंदंतु
वायातरस्तास्मिन्किंतुनयदिरसाविपुनःस्वापोविधेयामया। आखोराक्रमणोपकोणकुहराडु
फालमातन्वतीमार्जारीनखरैःकृतवतीकांकानमेदुर्दशा। २१ विदग्धाद्विविधावाग्विदग्धाक्रियाविद
ग्धायथा। निबिडतमतमालवल्लीमल्लीविचकिलराजिविराजितोपकंठे। पथिकसमुचितस्तव
धतीत्रसवितरितत्रसरित्तटनिवासः २२ क्रियाविदग्धायथा। दासायभवननाथेवदरीमपने
तुमादिशति। हेमंतेहरिणाक्षीपयसिकुठारंविनिक्षिपति २३ लक्षीतायथा। यत्कृतंतभृतयत्कृया
तदपिवाभूयात्। यद्भवतितद्भवतिवाविफलस्तवगोपनायासः २४ कुलटायथा। एतुवारि
कारणान्किरतिपुरुषान्वर्षतिनाभोधराःशैलाःशाद्वलमुद्वमंतिनसृजंत्येते पुनर्नायकान्। त्रै
लोक्येतरवःफलानिसुवतेनैवारभंतेजनानुधातःकातरमालपामिकुलटाहतोस्त्वयाकिंकृ
तं २५ अनुशयानातुवर्त्तमानस्थानविघटनेनभाविस्थानाभावशंकयास्थानाधिष्ठितसंकेत

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यलंप्रतिभर्तुर्गमनासुमानेननभवति। प्रत्येकमुदाहरणानि। समुपागतवतिचैत्रेनिपतंतिपत्रेलवंग
लतिकायाः। सुदृशःकपोलपालीशिवाशिवतालीदलद्युतिंलेभे २६ निद्रालुकेकिमिथुनानिकपोतपो
तव्याधूतनूतनमहीरुहपल्लवानि। तत्रापितन्विनवनानिकियंतिसंतिखिद्यस्वनप्रियतमस्यगृ
हंप्रयाहि। २७ कर्णकल्पितरसालमंजरीपिंजरीकृतकपोलमंडलः। निष्पतन्नयनवारिधारया
राधयामुररिपुर्निरीक्ष्यते २८ मुदितायथा। गोष्ठेषुतिष्ठतिपतिर्विधिराननंदानेत्रद्वयस्यनचपा
ढवमस्तियातुः। इत्थंनिगद्यतरुणीकुचकुंभसीम्निरोमांचकंचुकमुदंचितमातनोति २९ कन्यका
यथा। किंचि। कुंचितहारयष्टिसरलभ्रूवल्लिसाचिस्मितभ्रांतभ्रांतविलोचनद्युति। भुजापर्य
स्तकर्णोत्पलं। अंगुल्यास्फुरदंगुलीयकरुचाकर्णस्यकंडूयनंकुर्वाणान्नपकन्यकासुकृतिनंस
व्याजमालोकते ३० वित्तमात्रोपाधिकसकलपुरुषाभिलाषिणीसामान्यवनिता। नचाग्निमित्र
क्षितिपतावनुरक्तायामैरावसामव्याप्तिः। तत्रवित्तमात्रोपाधेरभावादितिचेतमेव। सापिकाश्मी
रहीरादिदातरिमहाराजेऽनुरक्तानतुमहर्षौतेनावगम्यतेतत्रापिवित्तमेवोपाधिरिति॥ सामान्या ४

8

यथा। दृष्ट्वाग्रांगणसन्निधौ बहुधनं दातारमभ्यागतं वक्षोजौ तनुतः परस्परमिवाश्लेषं कुरंगीदृशः। आनंदा
श्रुपयांसि मुंचति मुहुर्मालामिषात्कुंतलो दृष्टिः किंच धनागमं कथयितुं कर्णांतिके गच्छति ३१ एतास्वन्यसंभो
गदुःखिता। वक्रोक्तिगर्विता मानवत्यश्चेति त्रिविधा भवति। अन्यसंभोगदुःखिता यथा। त्वं दूति निरगाः कुंज
ं न तु पापिष्ठस्य सो गृहं। किं सुकाभरणं देहे दृश्यते कथमन्यथा। ३२ वक्रोक्तिगर्विता द्विविधा। प्रेमगर्विता सौ
र्य दर्यगर्विता च। प्रेमगर्विता यथा। वपुषि तव तनोति रत्नभूषां प्रियः इति धन्यतमासि किं ब्रवीमि। सखि
तनुनयनांतरालभीरुः कलयति मे न विभूषणानि कांतः। ३३ सौंदर्यगर्विता यथा। कलयति कमल
पमानमक्ष्णोः प्रथयति वाचि सुधारसस्य साम्यं। सखि कथय किमाचरामि कांते समजनि तत्र सहि(ष्णु)
तैव दोषः ३४ मानवती यथा। प्रियापराधसूचिकाचेष्टा मानः। स च लघुर्मध्यो गुरुश्च। अल्पापनेल
घुः। कष्टापनेयो मध्यमः। कष्टतमापनेयो गुरुः। व्यसाध्यसुरसाभासः। अपरस्त्रीदर्शनादिजन्यो लघुः
गोत्रस्खलनादिजन्मा मध्यमः। अपरस्त्रीसंगमादिजन्मा गुरुः। अन्यथा सिद्धकत्रहलाघपनेयो लघुः।
अन्यया सिद्धवादशपथाद्यपनेयो मध्यमः। चरणपातविभूषणाद्यपनेयो गुरुः। प्रथमं यथा। खेदांबुभिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कवनृपिच्छिलमंगभ्रमोशातोदरिरकचनकंटकितंकास्ति।अन्यांविलोकयतिभूषयतिप्रियपिमानः कुदास्य
तिपदंतवतन्नविघ्नः ३५ द्वितीयायथा। यज्ञात्रस्खलनंतत्रभ्रमायदिनमन्यते। रामवलिव्यालसस्पर्शं
शपथंतन्विकारथः ३६ तृतीयायथा। दयितस्यनिरीक्ष्यभालदेशाचरणालक्तकपिंगलंसपत्न्याः। सु
दृशोनयनस्यकोणभासाश्रुतिमुक्ताःशिरुवरापमावभूवुः ३७ एताः षोडशापिअष्टाभिस्वस्था
भिः प्रसेकमष्टविधाः।प्रोषितभर्तृकाखंडिताकलहांतरिताविप्रलब्धाउत्कावासकसज्जास्व
धीनपतिकाअभिसारिकाचेतिगणनाद्दष्टाविंशत्यधिकंशतंभवति।तासामामुत्तममध्यमाधमग
णनयाचतुरधिकाशीतियुतशतत्रयभेदाभवंति।यत्तुतासांदिव्यादिव्योभयभेदनगणनयाद्विपंचशदधि
कशतसहस्रंभेदाभवंति।।दिव्याइंद्राण्यादयः।अदिव्यामालत्यादयः।दिव्यादिव्यासीतादयइति।तन्न।अव
स्थाभेदेनैवनायिकानांभेदात्।जातिभेदेनभेदस्वीकारेनायकानामप्येवमानंत्यंस्यात्।इंद्रादयोदिव्या।
अदिव्यामाधवादयः।दिव्यादिव्यारामादयः।यद्यपिमुग्धायायथाधीरादिभेदाभावस्तथाविधप्रज्ञासा
मर्थ्याभावात्तथाप्युविधत्वाभावोपिभवितुमर्हःसतथापिप्राचीनलेखनानुरोधेननवोढामप्यालब्धेते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भेदाकंगतव्याः।वस्तुतोष्टविधविध्याप्रोढायाएवनवोढायातथाविधप्रत्नाद्यभावादिस्फत्वात।देशांतरगते
प्रयसिसंतापव्याकुलाप्रोषितभर्तृका।उत्काकलह्रिताविप्रलब्धानांपतिदेशांतरगतानभवतीनतत्रातिव्या
प्तिः।अस्याष्टादशावस्थाः।मुग्धाप्रोषितभर्तृकायथा।दूरंवदीर्घतरवहत्यपिसखीवर्गायनोभाषतेशैवालैः
शयनस्रजस्यपिपुनःशांतनवल्लिजया।कंठेगद्गदवाचमचतिदृशाधत्तेनवाष्पोदकंसंतापसहतेयदंबुजमुखी
तद्भवेतोभावः २८ मध्यासायथा।वासस्तेदवबपुषोवलयंतदेवसूस्यसंवजघनस्यचरत्नकां
ची।वांचालभृंगसुभगेसुरभौसमस्तमध्याधिकेभवतिमसखिकिंनिदानं २९ प्रौढासायथा॥मा
लावालांबुजदलमयीमौक्तिकीहारयष्टिःकांचीकिंचप्रवसतिहरौसभ्रुवःप्रस्थितेव।अन्यक्रमःकिम
पिधमनीवर्त्ततेवानवेतिज्ञातुंबाहारहहवलयंपाणिमूलंप्रयाति।परकीयासायथा।श्वश्रूःपद्मद
लंददातितदपिभ्रूसंज्ञयागृह्यतेसद्यामर्मरशोकयाननुनयासंस्पृश्यतेपाणिना।यानुर्वीत्विसु
हृद्गणस्यमनसाप्रस्तूत्तरंदीयतेश्वासाकिंतुनमुच्यतेकुतवहक्ररःकुरंगीदृशा ४१ सामान्यव
नितासायथाविरहविदितमेतःप्रेमविज्ञायकांतःपुरपिवसुतस्मादेसमेदास्पतीति।मरिचनिच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमस्त्रोन्यस्यवाष्पादविंदून्विसृजतिपुरयोद्वारदेषिशोपविष्टा ४२ अन्योपभोगचिन्हितः प्रात
रागछतिपतिर्यस्यासाखंडिता । प्रातरिसुपलक्ष्य तं अस्याश्चेष्टा । अस्फुटालापसंतापनिश्वासतू
ष्णींभावाश्रुपातादयः । मुग्धासायथा । वक्षोजचिह्नं किंमुकुलशंकितामितिकिमपिप्रष्टुमिछसा । नूय
नेनवोढसुदृशः प्राणेशः पाणिनापिदधे ४३ मध्यासायथा । वक्षोजचिह्नितमुरोदयितस्यवीक्ष्यदीर्घ
ननिश्वसतिजल्पतिनैवकिंचित् । प्रातर्जलेनवदनंपरिमार्जयंतीबालाविलोचनजलानिनिति
रोदधाति ४४ प्रौढासायथा । मामुग्धोस्यविपक्षपक्ष्मलदृशः पादांबुजालक्तकैरालिप्रानननमान
नीकृतमुखीचित्रार्पितेवाभवत् । रूक्षंनोक्तवतीनवाक्कृतवतीनिश्वासकोष्टदृशोप्रातर्मंगल
मंगनाकरतालादादर्शीमादर्शयत् ४५ परकीयासायथा । कांतंनिरीक्ष्यपलयांकितकंठदेशा
मुक्तासायापरमियापरुषानवाचः । दूतीमुखंमृगदृशासवलद्दवुपूराद्दूरास्मरंतुदधिरेनयनं
तपाताः ४६ सामान्यवनितासायथा उरस्तवापयोधरांकितमिदंकुतामेक्षमाततामपिनिधीय

६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तांवसुसुरायदंगीकृतं। इतिप्रचलचेतसः प्रितमस्यवाराख्रियाकणत्कनककंकणंकरतलात्समाकृष्यते १४
पतिमवमन्यपश्चात्परितप्ताकलहांतरिता॥ अस्याश्चेष्टा। भ्रांतिसंतापसंमोहनिश्वासज्वरप्रलापादयः॥मु
ग्धासायथा। अनुनयतिपतिंनलज्जमानाकथयतिनैवसखीजनायकिंचित्॥ प्रसरतिमलयानिलेन
वाढांवहतिविरायपरंतुशून्यमंतः॥४८ मध्यासायथा। विरमतिकथनंविनानखेदः सतिकथनेसमु
पैतिकापिलज्जा॥ इतिकलहमधोमुखीसखीभ्यालपितुमनालपितुसमाचकांक्ष ४९ प्रौढासायथा।
अकरोः किमुनत्रशाणिमानंकिमकार्षीः करपल्लवैर्निबोधं। कलहंकिमधाः सुधारसस्नेहितमर्थं
नविंदतिदैवदुष्टः ५० परकीयासायथा। भर्तुर्यस्यकृतेगुरुर्लघुरभूत्तगोष्टीकनिष्टीकृताधैर्यं
कोशाधनंगतंसहचरीनीतिः कृतादूरतः। निर्मुक्तातृणवत्रपाविरचितास्नातस्विनीविंदुवक्रोधा
सोप्यवधीरितोहतधियामातर्वृलीयान्विधिः ५१ सामान्यवनितासायथा। यत्कैकेरहलक्ष्मपा
णिकमलेभाग्यालयेयत्क्रुरन्यास्तवामममयल्ललाटफलकेभगपाक्षरंवेधसा। तत्सर्वंसखियोयथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्धमकरोन्नास्मिन्प्रकोपः कृतो धिङ्मां धिङ्मम जीवितं धिगतनुं धिक्चेष्टितं धिग्वयः ५२ संकेतस्थले प्रि
यमनवलोक्य समाकुलहृदया विप्रलब्धा ॥ अस्याश्चेष्टा ॥ निर्वेदनिश्वाससखीजनोपालंभचिंताश्रु
पातमूर्छादयः ॥ मुग्धाविप्रलब्धा यथा। आलीभिः शपथैरनेककपटैः कुंजोदरं नीतया शून्यं तत्र नि
रीक्ष्य विस्मितया न प्रस्थितं नास्थितं। न्यस्ताः किंतु नवोढनीरजदृशा कुंजोपकंठे तृषातातास्य भृंग
कदंबकं बरचमत्कारस्पृशो दृष्टयः ५३ मध्याविप्रलब्धा यथा। संकेतकेलिगृहमेत्य निरीक्ष्य शून्य
मेणीदृशोनिभृतनिःश्वसिताधारायाः। अर्धाक्षरं वचनमर्द्धविकासिनेत्रं तावलमर्द्धकवलीकृत
मेव तस्थे ५४ प्रौढाविप्रलब्धा यथा ॥ शून्यं कुंजगृहं निरीक्ष्य कुटिलं विज्ञाय चेतोभवं दूतीनापि
निवेदिता सहचरी पृष्टापि नो वामया। शंभो शंकर चंद्रशेखर हरश्रीकंठ शूलिन् शिव त्रायस्वेति
परंतु पंकजदृशा भर्गस्य चक्रे स्तुतिः ५५ कुरंकीया विप्रलब्धा यथा ॥ दत्वा धैर्यभुजंगमूर्द्धिचरणा
वुल्लंघ्य लज्जानदीमंगीकृत्य घकारपटलं तन्व्या न दृष्टः प्रियः। संतापाकुलया नयान्वपरितः पाथोधरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गर्जति क्रोधाक्रांत कृतांतमत्तमहिषभ्रांसा दृशोयो जिते ५६ सामान्यवनिताविप्रलब्धायथा॥ कपटवच
नभाजकेनचिद्धूरयायासकलरसिकगोष्टीवंचिकावंचितासौ। इति विहसति रिंगभृंगविक्षिप्तचक्षुर्विवृचकु
सुमकांतिछन्नाकेलिकुंजः ५७ संकेतस्थलप्रतिभर्तुरनागमनकारणंचिंतयंती उत्का। अवधिदिव
सानागतप्रोषितपतिकाया नानिव्याप्तिः। तस्याभर्तुरवधिदिवसे भवनगमनं नियमइतिसंकेतपदेनेत
द्व्यावर्तनात्। अस्याश्चेष्टा। अरतिसंतापजंभाशंकाक्षिकंपरुदितस्वावस्थाकथनादयः। मध्योउ
त्कायथा। आनतुंनगता किंमुप्रियसखीभीतो भुजंगात्किंसुकुंद्धावाप्रतिषेधवाचिकिमसौप्राणेश्व
रो वर्त्तते। इत्थं कर्णसुवर्णकेतकरजःपातापद्यतत्फलादक्ष्णाः कापिनवोढनीरजमुखीबाष्पोद
कंमुंचति ५८ मुग्धाउत्कायथयन्नाद्यापिसमागतः पतिरिति प्रायःप्रपेदे परां रथ्यैचेतसि चिंत
यंतंपिसखीन व्रीडया पृच्छति। दीर्घनिश्वसितंदधातिचकिंतं नप्रेक्षते केवलं किंचित्सक्तकपलाउ
पांडुररुचिंधत्तेकपोलस्थली ५९ प्रौढाउत्कायथा॥ भ्रातर्निकुंजसरिवंयूथिरसालवंधोमात

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मारविनिपितास्तिमिरप्रसीद।पृच्छामिकिंचिदपिनीरधराभिरामोदामोदरःकथयकिंनसमाजागामः। वी ६० ॥
परकीयाउक्तायथा।स्नातंबारिदबारिभिर्विरचितावासोघनेकाननेशीतेस्वेदनविंदुभिर्मनसिजोदेवःस
माराधितः।नीताजागरणव्रतेनरजनीव्रीजाकृतादाक्षिणातसंकिंतपस्तथापिसकथनाद्यापिनत्रा
तिथिः।सामन्यवनितायथा।कथंनकांतःसमुपैतिकंजमियंविरंचतासिचितयंती।अद्यालयेत्रि
पलदस्रुधारावारांगनाकापिधनाभिलाषात्।६२ अथमेप्रियआयास्यतीतिनिश्चित्यसुरतसामग्री
करोतिसावासकसज्जा। वासकोवारः।अस्याश्चेष्टा।मनोरथसखीपरिहासदूतीप्रश्नसामग्रीसंपाद
नमार्गविलोकनादयः।मुग्धावासकसज्जायथा।हारंगुफतितारकांतिरचिरंश्रांतिकांचीलतांदीप
न्यस्यतितत्रकिंतुवकुलस्नेहेनदत्तेपुनः।आलीनामितिवासकस्परजनीकामानुरूपांक्रियांसाचि
स्मरसुखीनवोदसुसुखोदूरात्समुद्वीक्षते ६३ मध्यावासकसज्जायथाशिल्पदर्शयितुकरोतिकतुका
त्कतल्परहारस्त्रजंचित्रप्रेक्षणकैतवेनकिमपिद्वारंसमुद्वीक्ष्यते।गृह्णासाभरणंनवंसहचरीभूषाजि
गीषामिषादिष्टंपश्यदृशःप्रतीक्ष्यवरितस्मेराननाभूत्स्मरः ६४ प्रगल्भावासकसज्जायथा।कृतंच ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुषिभूषणंविकरधोरणीधूपिताकृताशयनसन्निधौक्रमुकवीटिकासंभृतिः।अकारिहरिणीदृशाभवनम
सदेहत्विषास्फुरत्कनककेतकीकुसुभकांतिभिर्द्दिनं ६९ मनोरथश्च्ययया। मनोरथश्च्ययथा।आवयो
रंगयार्द्ददतभूयाच्चिरहविवः।अद्दते चास्मितं स्फीतिनस्यादन्योन्यवीक्षितं ६६ परकीयावासकसज्ञा।
यथाश्वश्रूस्वापयतिच्छलेनचतिरोधत्तेप्रदीपाकरधत्तेसौधकपातपातनिनदैः सांकेतिकंचष्टितं।
शश्वत्पार्श्वविवर्त्तितांगलतिकंलालत्कपालघुतिक्वपिक्वापिकरांवुजप्रियधियातल्यांतिकेस्पृशति ६७
सामान्यावासकसज्ञायथा। चोलंनीलनिचोलकर्षणविधौचूडामणिंचुवनेयात्त्विष्यकुचयोः करार्प
णविधौकांचीपुनःकांचनी।इत्थंवदनचर्विर्तैर्मृगमदोरंगानिसंस्कुर्वतीतत्किंपत्रमनोरथंनकुरुते
वारेषुवारांगना ६७ सदाकृतान्साकरप्रियतमास्वाधीनभर्तृका।अस्याश्चचेष्टा।वनविहारादिमद
नमोहोत्सवमदाहंकारमनोरथावाप्तिप्रभृतयः।मुग्धास्वाधीनपतिकायथा। मध्येनकृशिमास्त
नेनगरिमादेहेनवाकांतिमाश्रोणेनप्रथिमागतोनजडिमानेत्रेनवावक्रिमालास्येनद्राढिमानवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्विपटिमलास्येनवास्फीतिमात्राणेशस्यतथापिमज्जतिमनोमप्येवकिंकारणं ६९ मध्यास्वाधीनपतिका
यथा। यदपिरतिमहोत्सवेनकारोयदपिकरेणान्वनीविधारणानि। प्रियसखिपरिरेषपार्श्वे दर्शनदपि
नमुंचतिचकिमाचरामि ७० प्रौढास्वाधीनपतिकायथा। वक्रस्याधरपल्लवस्यवचसोहासस्यलो
स्यवाधन्यानामरविंदसुंदरदृशांकांतस्तनोतिस्तुतिं। स्वप्नेनापिनगच्छतिश्रुतिपथंचतःपथंद
कूपयंकाप्यन्यादर्पितस्यमसखिकथंतस्यास्तुभेदस्पृहः ७१ परकीयास्वाधीनपतिकायथा।
स्वीयाःसंतिगृहेसरोरुहदृशोयासांविलासक्वणत्कांचीकुंडलहेमकंकणझणत्कारोनविश्राम्य
ति। कौतुःसखिकानने नूपुरपथसौधेसारवीसन्निधौभ्राम्यतीमपिवल्लभस्यपरितादृष्टिर्नमां
मुंचति ७२ सामान्यवनितास्वाधीनपतिकायथा। संस्पर्शवत्रतिमंदिरमृगदृशोयासांसुधासा
गरस्नातःस्यूतसरोजसुंदरचमत्काराहृशोविभ्रमाः। चित्रंकिंतुविचित्रमन्मथकलावैदग्ध्य
हेतोःपुनर्वितंचित्तहरंप्रयच्छतियुवामप्येवकिंकारणम् ७३ स्वयमाभिसरतिप्रियमभि

१

१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सारयति वायासाभिसारिका। अस्याश्चेष्टाः समयानुरूपभूषणशंकाप्रज्ञानैपुण्यकपटहासाद्यरतिपर
कीयायास्तु प्रक्तन एवक्रमः। मुग्धाभिसारिकायथा। दूती विद्युदुपागतासहचरीरात्रिःसतस्यायिनी।
दैवज्ञोदिशतिस्वनेनजलदः प्रस्थानवेलांशुभां। वाचंमांगलिकींतनोतितिमिरस्तोमोपिसिंल्लीरवै
र्ज्वोतायेदर्पिताभिसारसमयोमुग्धेविमुंचत्रया ७४ मध्याभिसारिकायथा। भीतासिनैवभुजगात्स
थिमभुजस्यसंगेपुनः किमपिकंपमुरीकरोषि। अंभोधरध्वनिभिरक्षमितासितन्विमद्धाविसाध्विव
दनासिकिमाचरामि ७५ प्रगल्भाभिसारिकायथा। स्फुरदुरसिजभारभंगुरांगी किसलयकोमलको
तिनापदेन। अथकथयकथंसहेतगंतुयदिनविशासुमनोरथोरथः स्यात् ७६ परकीयाभिसाकाय
था। रभसादभिसर्तुमुद्यतानांवनितानांसखिवासरोदाविवस्वान्। रजनीदिवसोंधकारमंर्चिविंपिरंबेभ
कुमार्गएवमार्गः ७७ ज्योत्स्नाभिसारिकायथा। चंद्रोदयेचंदनमंगकेषुविहस्यविन्यस्यविनिर्गतायाः
मनोनिहंतुमदनोपिबाणान्करेणकोदांन्विभरावभूव ७८ कृष्णाभिसारिकायथा। नांबुजैर्नकु
मलैरुपमेयंस्वैरिणीजनविलोचनयुग्मं। नोदयेदिनकरस्यनचंद्रेः केवलंतमसितस्यविकासः ७९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०

दिवसाभिसारिकायथा। पल्लीनामधिपस्य पंकजदृशांपर्वोत्सवामत्रणेजातेसमजनामिथः कृतमहोत्साहं पुरः प्रस्थिताः सव्याजंस्थितयोर्विलस्यगतयोः शुद्धांतमंत्रांतरेस्तनाः स्विन्नकपोलयोर्विजयतेकोप्येष केश्यग्रहः ८० सामान्यवनिताभिसारिकायथा। लोलज्ज्वालचमत्कृतिप्रविलसत्कांचीलतासंकृतिन्यंचलकुचकुंबंधबंधुरवलद्वक्षोजकुंभोन्नति। स्फूर्जद्दीधितिविस्फुरत्कृतिवलज्झामीकरालंकृतिक्रीडाकुंजगृहंप्रयातिकृतिनः कस्यापिवारांगना ८१ मुग्धायाः लज्जाप्राधान्येनमध्यायाः लज्जामदनसाम्येनप्रगल्भायाः प्रकाशप्राधान्येनधीरायाः धैर्यप्राधान्येनअधीरायाः अधैर्यप्राधान्येन धीराधीरायाः धैर्याधैर्यप्रधान्येनज्येष्ठायाः स्नेहाधिक्यप्रधान्येनकनिष्ठायाः स्नेहन्यूनत्वप्रधान्येनमुग्धायानवोढायाः परकीयायाः संगुप्तिप्राधान्येनमुग्धायाइवकन्यकायाः सामान्यवनितायाः धनप्राप्तिधान्येनाविधनायिकावर्णनमितिविशेषः। प्रस्थानंवलयैः कृतंप्रियसरवैरस्त्रैरजस्त्रंगतंधृत्यासानक्षणमासितंव्यवसितंचित्तेनगंतुंपुनः। गंतुंनिश्चितचेतासिप्रि

१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतोमेसर्वेसमंप्रस्थितागंतव्येसतिजीवितप्रियसुहृत्सार्थः किमुत्सृज्यते ८२ इत्यादिप्राचीनग्रथकारले
खनात्। अग्निभक्षणेदेशांतरगमनेनिश्चितचेतासित्रयसिप्रोष्यत्पतिकापिनवमीनायिकाभवितु
मर्हति। तथाहितस्याः प्रोषितपतिकाविप्रलब्धोत्कासुनांतर्भावः भर्तुः संनिधिवर्त्तित्वात्। नकल
हांतरितायामंतर्भावः कलहाभावात्। अनवमानितपतित्वाच्च। नापिखंडितायामंतर्भावः उपभो
गचिन्हाद्यभावात्॥ प्रियायाः कोपाभावदर्शनात्। काकवचनकातरश्रणादिसूचितातः पश्च
पतित्वदर्शनाच्च। नापिवासकसज्जायामंतर्भावः। वारनियामभावात्। लज्जाकरणभावात्।
निर्वेदादिदर्शनाच्च। नस्वाधीनपतिकायामंतर्भावः। अग्निभक्षणएवसंगस्यविच्छेददर्शनात्।
नहिस्वाधीनपतिकायाः कदाचिदपिसंगविच्छेदइतिसंप्रदायः। व्रजन्नपिपतिः स्वाधीनपतिक
यानिरुध्यते। अन्यथाभर्तरिस्वाधीनत्वमेवतस्यानभवेत्। नेहतथा। सर्वथाभर्तुर्विदेशागम
नात्। किंचिन्निर्वेदाश्रुपातनिस्वासवनविहारादिमदनमहोत्सवव्यतिरेकेदर्शनाच्च। नापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभिसारिकायामंतर्भावः। अभिसारोत्सवाभावात्। अंतस्त्यपदर्शनाज्ञेतिपुक्तमुपपश्यामः। लक्षणं
तु। यस्याः पतिरग्निमक्षणेदेशांतरं यास्यसेवसात्रोष्यसतिका। अस्याश्चेष्टाकाकुवचनकातरप्रेक्ष
णागमनविघ्नोपदर्शननिर्वेदसंतापसंमोहनिश्वासवार्ष्पोदयः। मुग्धात्रोष्यत्पतिकायथा। प्राणेश्वरांके
मपिजल्पतिनिर्गमपक्षामोदरीवदनमानमयांचकार। आलीपुनर्निन्तमसलतानिकुंजमुन्मत्त
कोकिलकलध्वनिमातुतान। ५३ माध्यात्रोष्यत्पतिकायथा॥ गंतुंप्रियवदतिनिश्वासितनदीर्घ
मासीन्नवानयनयैर्जलमाविरासीत्। अयुलिपिपपढितुमेणदृशः परंतु भालस्थलीकिमुच्चकैः
समुपाजगामप्रौढात्रोष्यत्पतिकायथा॥ नायंमुचतिसुभ्रुवामपितनुंत्यागेवियोगज्वरस्तेनातिविहितां
जलिर्यदुपतेपृच्छामिसायंवद। तांबूलंकुसुमपटीरमुदकंयद्धुनिर्दीयतेस्यादत्रैवपरत्रतात्किमुविष
ज्वालावलीदुःसहं ५९ परकीयात्रोषितसतिकायथा। न्यस्तांपत्रगमंप्रद्धवादयुगलंभक्तिर्विमुक्ताग
रोस्तत्कानीतिरकारिकिन्नभवतोहेतोर्मयादुःकृतं। अंगनांशतयाततानयनयोःकोपिक्रमोरो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रव:कुभीयाकपसंभवश्चमनसोयुक्तंत्वपिप्रस्थिते ९६ सामान्यवनिताप्रोष्यत्पतिकायथा।मुग्धेप्रदे
हिवलयायभवद्धियोगमासाद्ययास्यतिवहि:सहसापदेतत्।इयंनिगद्यावगलयन्ननांबुधाराबारांगना
प्रियतमंकरयोर्वभार ९७ अहितकारिण्यपिप्रियेहितकारिण्युत्तमा।अस्याउत्तमैवचेष्टा।तद्यथा।
पति:शयनमागत:कुचविचित्रितोरस्थल:प्रसन्नवचनामृतैर्यमतर्पिवामभ्रुवा।अचर्विसुभगास्मितय
तिपटीरपंकद्रवैरयुजिविलसद्भिलोचनचमत्कृतैरंबुजै: ९८ हिताहितकारिणीप्रियतमेहिताहितचेष्टा
कारिणीमध्यमा।अस्यास्तुव्यवहारानुसारिणीचेष्टामायथा।कांतेसागासिकेंचुकस्पर्शितपासाचीकृत
ग्रीवयामुक्ता:कोपकषायमन्मथशर:क्रूरा:कटाक्षांकुरा:।साकूतेदरहासपेशलवचामाधीकृथा
रालसाप्रीतिक्लृप्ताचकांचनमहादामीकृतासुभ्रुवा ९९ हितकारिण्यपिप्रियहितकारिण्यधमा।
एषैवचनिर्निमितकोपनाचंडीत्यभिधीयते॥अस्यानिष्कारणकोपत्वादधमैवसकलाचेष्टा।अथ
मायथा।प्रस्थानेतवय:करोतिकमलछायांमुखांभोरुहेप्रोरवंडद्रवधारयाशिशिरयामार्गेपुन:सि

23

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नृति। तस्मिन्प्रेयसि विद्रुमद्रुवनदीरिंगतरंगभ्रमीभ्रांतक्रांतसरोजपत्रसदृश। भयोदृशाकुध्यसि ९०
विस्तरभयात्त्रसेकमेतासामुत्तममध्यमाधमभेदेनो दाहृताइति। विश्वासविश्रामकोरिणीपार्श्वचारी
णीसखी। अस्याः मंडनोपालंभशिक्षापरीहासप्रभृतीकर्माणि॥ मंडनं उधमभेदेन यथा। स्तनकन
कमहीधरोपकंठेप्रियकरपल्लवसुल्लसत्प्रमोदं। रहसिमकरिकामिषाल्लिखती कमलमुखीक
मलैः सखीजघान ९१ उपालंभायथा। सांद्रभ्रानैर्मुखरितदिशः श्रेणयस्तोयदानां धारासारे
धरणीवलयंसर्वतः प्लावयंति। तेनस्नेहं वहतिविपुलमस्सखीयुक्तमेवत्वन्निःस्नेहोयदसितदिंदेना
थमेविस्मणाया ९२ शिक्षायथा॥ सानं दमालिवनमालिविलोकनायनिर्गच्छकुंजमितितिकिंतुवि
चारयेथाः। संकारिणाम धुकरादिवसेभ्रमंतिरात्रौपुनश्चपलचंचुपुठाश्चकोराः। परिहासोयथा। आगार
भित्तिखिनासुनिवेदयस्वकससमोदशासुमूर्तिषुलोकभर्त्तुः। इत्थंसखीजनवचः प्रतिपद्यस
घः सीताऽस्मितद्युतिमिस्तरयांचकार ९४ सख्यापरिहासवत्प्रियस्यापिपरिहासः। यथा। भ्रू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संतपादिशसितविसरवीनवाम्रिरिष्यंविहस्यमुरवैरिणिभाषमाणे।राधाविशायदशानव्रणदूयमानं
विंबाधरावदनमानमयांचकारः १५ प्रियस्यपरिहासवत्सेयस्याअपिपरिहासः।यथा।दिव्यंवारिक
थंयतःसुरधुनीमौलौकथंपावकोदिव्यंतद्धिविलोचनंकथमहिर्दिव्यंसवांगेतव।तस्मात्द्यूतविधौत्वयाद्य
मुषितोहारःपरित्यज्यतांमिथ्यंशैलभुवाविहस्यलपितःशंभुःशिवायास्तुवः १६ दूतस्यापायापरपारं
गमादूती।तस्याःसंघट्टनविरहानिवेनादीतिकर्माणि।संघट्टनंयथाअंचतिरजनिरूढंचतितिमिरमि
दंदूतीवंचतिमनोभूः।उत्क नस्यजयुक्तविरचरक्तमनस्तास्मिन् १७ विरहनिवेदनंयथा।च
त्रैचंद्रमुखीप्रदीपकलिकाधात्राधरामंडलेतस्यादेववशाद्दापिवरमात्रायःसमुन्मीलति।तद्व
त्रैचंद्रसुखोप्रदीपकलिकाधात्राधरामंडलेतस्यादैववशाद्यपिवरमात्रायःसमुन्मीलति।तद्व
मशिरसानतेनसहसाश्रीकृष्णनिक्षिप्यतांस्वेहस्तेत्रतथानभवतित्रैलोक्यमंध्यंतमः १८ मृगारस्या
भयनिरूप्यत्वेननायकोपिनिरूप्यते।सचत्रिविधः।पतिरूपपतिर्वैशिकश्चेति।विधिवत्पाणिग्राहकः
पतिः।यथाःत्वंपीयूषमयूखमुत्तशिरासिस्निग्धान्सुधाशीकरान्त्वभोगींद्रविलंवसेकिमुफणाभो
गैःशनैर्वीजय।त्वंस्वर्वाहिनिकिंचासिंचसलिलैरंगंशिरीषोपमैःसेयंशैलसुतकठोरमहसःकों

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यापथिकाम्यति ९९ अनूकूलदक्षिणधृष्टशठभेदात्पतिश्चतुर्द्धा ॥ सार्वकालिकपरांगनापराङ्मु
खत्वेसतिसर्वकलमनुरक्तोनुकूलः ॥ यथा ॥ पृथ्वित्वंभवकोमलादिनमणेत्वंशैत्यमंगीकुरुत्वंवर्त्म
नूलघुतांत्रयाहिपवनत्वंखवदमुत्सादय ॥ सान्निध्यमश्रयदण्डकावनगिरेर्निर्गच्छिमार्गास्थिति: सीता
विपिनमयासलयतोनिर्गमुमुत्कण्ठते १०० सकलनायिकाविषयसमसहजानुरागोदक्षिणः ॥ यथा ॥
एतत्सुरः स्फुरतिपद्मदृशा सततस्वभक्तिहृदयंकथयकुत्रनिवेशयामि ॥ इत्याकलय्यनयनांबुरुहानि
मौल्परामाचितनवपुषास्थितमच्युतन १ भूयोनिःशङ्कः कृतदोषोपिभूयोनिवारितोपिभूय:
मश्रयपरायणोधृष्टः ॥ यथा ॥ वद्धाहारैःभुजकमलयाद्वारतोवारितोपिस्वायन्नात्वापुनरुपगतोदूर
तोदत्तदृष्टिः ॥ तल्पोपातकनकवलयंमुक्तमन्वेषयन्त्पादृष्टोभ्रष्टः पुनरपिमयापार्श्वएवप्रसुप्तः ॥ का
मिनीविषयकपठपटुःशठः ॥ यथा ॥ मौलौदामविधायभालफलकेव्यालिख्यपत्रावलिंकेयूरभुज
योनिधायकुचयोर्विन्यस्यमुक्तात्मजं ॥ विश्वासंसमुपार्जयन्मृगदृशः कांचीनिवेशच्छलान्नीवि

१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रंथिमपाकरोतिमृदुनाहस्तेनवामभ्रुवः ३ आचारत्तानिहेतुः।प्रतिरूपपतिः।यथा।शंकाभ्रष्टखलितेन
यत्रनयनभ्रांतेननप्रेक्ष्यतेकेयूरध्वनिभूरिभीतिचकितेनात्रवाश्लिष्यते।नोवायत्रशनैरलभदशन
विंबारपीयतेनोवायत्रविधीयतेचभणितंतत्किंरतंकामिनः ४ उपपतिरपिचतुर्द्धा।परंतुशठवतत्र
नियतं।अनियताः परावकुलवेश्योपभोगरसिकोवैशिकः।यथा।कांचीकलक्वणितकोमलनाभिकं
तिपारावतध्वनितचित्रितकंठपालिम्।उद्भ्रांतलोचनचकोरमनंगरंगमाशास्महेकमपिवारवि
लासवत्याः ५ वैशिकस्तूत्तमाधममध्यभेदेनत्रिधा।दपितायाःभूयाः प्रकोपेपिउचारपरायण
उत्तमः यथा।चक्षुःप्रांतमुदीक्ष्यपक्ष्मलदृशः शोणारविंदश्रियंनोक्षैर्जल्पतिनास्मितावितनु
तेगृह्णातिवीटीनवा।तल्पापांतमुपेत्यकिंतुपुलकभ्राजत्कपालद्युतिः कांतःकेवलमानतेन
शिरसामुक्तास्रजेगुंफति ६ प्रियायाः प्रकोपेपियःप्रकोपमनुरागंवान्प्रकटयतिचेष्टाया
भावेवागुह्णातिसमध्यमः।आस्यंयद्यपिहास्यवर्जितमिदंलास्येनवीतंवचोनेत्रंशोणस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोजकांतितदपिक्षणपिक्षणंस्थायतो। मालायाः करणोपमोमकरिकारंभः कुचाभोगयो। भपः कंत
लधारणीषुसुदृशः सायंतनोदृश्यते। भय कृपालज्जा भून्यः कामक्रीडायामकृतकृत्सा कृसविचा
रोधमः। यथा। उदपतिहृदियस्पनेवलज्जानचकरणेनचकापिभीतिलेशः। वकुलमुरलको
शाकोमलांमांपुनरपितस्यकरेनयातयथा। ८ मानीचतुरस्वाशाढएवातभवति। मानीयथा। वा
ह्याकूतपरायणतचवचोवज्रोपमेयमतोश्रुत्वावाचमिमामयास्पविनयव्याजाद्दृहिः प्रास्थि
ते। प्रातर्वीतिविलोकनपरिहृतालापतिवृत्ताननप्राणेशोनियतोनिहतकृपणवामभुवोद
श्यः ९ वाक्चेष्टाव्यंग्यसमागमश्चतुरः। वचनव्यंग्यसमागमोयथा। तमोजटालहरि
दंतरालेकालोनिशायास्तवनिर्गतायाः तटनदीनोभिकटेवनीनांघटतशातोदरिकः सहा
या १० चेष्टाव्यंगसमागमोयथा। कोतेकनरुजंवीरकरेकिमपिकुर्वति। आगारलिखि
तेभानौविंदुमिंदुरवीददौ। सोषितः पतिरूपपत्तिर्वैशिकश्चभवति। क्रमेणोदाहरणानि। १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उरूरंभा दृगपि कमलं शैवलं केशपाशो वक्त्रं चंद्रो लापितममृतं मध्यदेशो मृणालं । नाभिकूपावलिरपि सरित्प्लवः किंच पाणिर्यस्याः सा चेद्दुरसिनकथं हन्त तापस्य शांतिः पात्वा सरः सलिलकेलिकृतूलायव्याजादुपेसमयि वर्त्मनि वर्त्तमाने । अंतः स्मितद्युति चमत्कृत दृक्तरंगैरंगीकृतं किमपि वामदृशा स्मरामि । अभूतपरितन्त्रिवातं वधमुषितनकारमवक्रदृष्टिपातं । प्रकटस्मितमुन्नतास्य बिंबं पुरसुदृशः स्मरतोपितं स्मरामि । अनभिज्ञो नायको नायकाभास एव । यथा । शून्ये क्षमनियोजितावद्रक्रियाभंगैर्वनांतिजनं पुष्प्याजमुपेत्य सस्वरलमथास्फारीकृता दृष्टयः । ताम्बूलाहरणच्छलेन विहितौ व्रक्षौ च वक्षोरुहावेतेनापि न वेति हूतिकियतायलं न सज्ञास्यति १६ न च नापि कथ्यादेवनायकस्यापि भेदाः सन्त्विति वाच्यं । तस्या अवस्थाभेदेन भेद इति विशेषात् । आनुकूल्यत्वं दक्षिणत्वं धृष्टत्वं शठत्वमिति चत्वार एव नायकस्य स्वभावा इति । अन्यथा अवस्थाभेदेन यदि नायकस्य भेदः स्यात्तदोक्तविप्रलब्धखंडितादयो नायिका स्वीकर्त्तव्याः । तथा च संकेतव्यवस्थायां स्त्रीणामनागमने ध्वंसंप्रदायादन्यसमागम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शंका। धूर्त्तत्वंवान्यसंभोगविशिष्ट्तत्वंवानायकानांनतुनायिकानां। ताः प्रतितद्भावनेरसाभासायति
रितियुक्तमुत्पश्यामः॥ तेषांतुनर्मसचिवः। पीठमर्दविटचेटकविदूषकभेदाश्चतुर्धाः। कुपितस्त्रीप्रसा
धकः पीठमर्दः। यथा। कोपकोपविधिः प्रयच्छकरुणागर्भवचोजायतापीयूषरवदीर्घिकापरिमलैरामे
दिनीमेदिनी। आस्तांवास्पृहपानुलावनमिदंव्यावर्तयंतीमुहुर्यस्मैकुप्यसितस्यसुंदरितपोवृंदानिवंद
मते १७ कामतंत्रकलाकोविदोविटः। यथा। आयातः कुमुदेश्वरोविजयतेसर्वेश्वरोविजयतेमारस्ताभृंगः
स्फूर्जतिभैरवैर्वणनिकंठप्राणेश्वरामुंचति। एतासिद्धरसाः प्रसूनविशिखावेध्यानवध्यात्वामानव्याधिर
सोकूशोदरिकथंत्वश्चेतस्मिस्थास्यति १८ संधानचतुरश्चेटकः। यथा। साचंद्रसुंदरमुखीसखनंद
सूनुर्देवात्रिकुंजभवनंसमुपाजगाम। अत्रांतरेसहचरस्तरुणोकदारेपानीयपानकपटेनसरः
प्रतस्थे १९ अंगादिवैकृत्यैर्हास्यकारीविदूषकः। यथा। आनीयनीरजमुखीशयनोपकंठसुत्कं
ठितोस्मिकुचकंचुकमोचनाय॥ अत्रांतरेमुहुस्कारिविदूषकेनप्रोतस्तनस्मरणकुक्कुटकंटना

१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दः। २० स्वेदस्तंभोथरोमांचः स्वरभंगोथवेपथुः। वैवर्ण्यमश्रुप्रलयइत्यष्टौसात्विकागुणाः। भेदो
वाचिदशोर्जलकुचतटस्वेदः प्रकंपोधरेपांडुर्गंडतटीवपुः पुलकितंलीनंमनस्तिष्ठति। आलस्यंनयनाश्रिय
श्वरणयोस्तंभः समुज्जृंभते तत्किंराजपथेनिजामधरणीपालोपमालोकितः २१ रतिस्थायिभावः।
शृंगारः सचद्विविधः। संभोगोविप्रलंभश्च। संभोगोयथा। वियतिविलोलतिजलदः स्खलतिविधुश्च
लतिकूजतिकपोतः। निःपततितारकाततिरांदोलतिवीचिरंमरवाहिन्याः २२ विप्रलंभोयथा। प्रा
दुर्भूतेनवजलधरेत्वन्यथंद्रष्टुकामाः प्राणाः पंकेरुहदलदृशः कंठदेशंप्रयांति। अन्यत्किंवातवसुरव
विधुंद्रष्टुमुड्डीयगंतुंवदकः पक्षंसृजतिविसिनीपल्लवस्यछलेन २३ विप्रलंभेचाभिलाषचिंत
स्मृतिगुणकीर्तनोद्वेगप्रलापोन्मादव्याधिजडतानिधनादिदशावस्थाभवंति। तत्रसंगमेछाभिला
षः। अभिलाषोयथा। तस्यासुतनुसरस्याचेतानुयनंचनिष्पतितं। गुरुनेतो विनिमग्नंलघुनय
नंसर्वतोभ्रमति २४ दर्शनसंतोषयोः प्रकारजिज्ञासाचिंतनं। यथा। मयाविधेयोमुहुरघत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मिन् कुंजोपकंठे कलकंठनादः। राधामघो विभ्रममावहंती कुर्वीत नेत्रोत्पलतोरणानि २१ प्रि
याश्रितचेष्टाद्युद्बोधितसंस्कारजन्यज्ञानं स्मृतिः। यथा। रामो लक्ष्मणदीर्घदुःखचकितो नो वि
स्करोति व्यथां श्वासेनोष्णतरं जहाति सलिलं धत्ते न वा चक्षुषि। वातावर्तिविवर्तमानदहन
क्रूरैरनंगज्वरैः। क्षामः किं तु विदेहराजतनयां भूयः स्मरन्वर्त्तते। विरहकालेन कांताविषयकं
कृप्रशंसा प्रतिपादनं गुणकीर्त्तनं। यथा। स्पर्शः स्तनतटस्पर्शो वीक्षणं वक्त्रवीक्षणं। त
स्याः केलिकथालापसमयः समयः सखे। २० कामक्लेशजनितसकलविषयहेयताज्ञानं
उद्वेगः। यथा॥ गरलमुमकंदमिंदुबिंबं करुणवारिजवदाणीवसंतः। रजनीस्मरभूपतेः कृपाणीक
रणीयं किमतः परं विधातः। २८ प्रियाश्रितकाल्पनिकव्यापारः प्रलापः। कल्पनायाः कारणमतः
करणविक्षेपः। तस्य च निदानमुत्कंठा। यथा। अर्द्धसंवीक्षणं चक्षुरर्द्धसंमिलनं मनः। अर्द्धसंस्पर्श
नः पाणिरद्य मे किं करिष्यति २९ औत्सुक्यतापादिकारितमानसविपर्याससमुत्थप्रियाश्रितवृ १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थाव्यापारउन्माद्ः। व्यापारः कायिकोवाचिकश्च। कायिकोयथा। प्रतिफलममृतांशोः प्रोक्ष्य कांतोम्मृगा
क्ष्यामुखमितिपरिहासंकर्तुमभ्युद्यतोभूत्। अथशिथिलितवाचामानमाशंक्य तस्याः स्पृशतिपुलकभा
जापाणिपकेरुहेण २० वाचिकोयथा॥ किरविधामृगदृशामुखमद्वितीयकंदर्पदर्प्यसिद्धावुजमन्यदेव
सकारमाचरसिभृंगतनुर्नतादृक्कर्माणिधिक्पुनरीदृशमीक्षणीय २१ मदनवदनासमुत्थसंतापकार्श्या
दिदोषोव्याधिः। यथा। कोदंडविशिखाभनानिचसतिः कामस्यतस्याअधिभ्रूदलीनयनांचलमनसितवासः
समुन्मीलति। इत्थसाम्यविघातयाः प्रभवतिस्वामिंस्तयाप्यसितातन्वानातनुताक्रमादतनुतानेषायथागछ
ति ३२ विरहव्यथाविकारमात्रेवव्यतीवनावस्थानंजता। यथा। पाणिर्निरिवकंकणःस्तनतटीनिष्कंपमामां
शुकाघटीनिश्चलतारकासमभवन्निस्ताण्डवकुण्डल। कश्चित्रापितयासमंकृशतनोर्भेदोभवेन्नोयदित्वन्नाम
स्मरणेनकापिपुलकारंभासमुज्जंभते ३३ स्वप्नचित्रसाक्षाभेदेनदर्शनंत्रिधा। स्वप्नदर्शनंयथा। मुक्ताह
रंनचकुचगिरः। कंकणनवहस्तात्काणांभरणमपिवानीतवानेवतावत्। अयस्वप्नेवकलमुकुलेभूषणं
संदधानःकापंचोराहृदयमहस्तान्वितप्रतीमः ३४ चित्रदर्शनंयथा। नीवीहरदुरासिजैविलिखन्नरवेन

33

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दंतच्छदं च दशनेन ददेशेर कस्मात् । इत्थं पठे विलिखितं दपितं विलोक्यबालापुरवनजलहारविहारशंको २५
साक्षाद्दर्शनं यथा ॥ वनश्च चलतासज्जप्रियसखिद्रोडनमोपीऽभातमुचहशोनिषभगवन्कामक्षणं
क्षम्यतां । वाहिमूर्द्धनिकर्णयोः कुवलयं वंशदधानः करेसायलोचनगोचरोभवतिमोदामोदरः सुंदरः ३६
माध्वीकस्यंदसंदोहसुंदरीरसमंजरी । कुर्वंतु कवयः कर्णभूषणं कृपयामम ३७ तातायस्यगणे
श्वरः कविकुलालंकारचूडामणिर्देशोयस्यविदेहभूसुरसरित्कल्लोलकिर्मीरिता । यद्येनस्वकृत
नतनकविनाश्रीभानुनायोजितावाक्देवीश्रुतिपारिजातकुसुमस्पर्द्धाकरीमंजरी ३८ इतिश्रीम
द्भानुदत्तप्रकाशितारसमंजरीसमाप्ता ॥ श्रीरामचंद्रायनमः रदपुस्तकदाजीबाबुदीयाहीचेजा
नीजेसस स्वार्थ परोपकारार्थ लिखन करवीले असे याचाकोणाआभीलाश केल्यासकल्पवरी
रौरवभोगणेलागेल ॥ शके १७६९ शालीवान ॥ वीश्वावसुनासंवत्सरे दक्षिणायेणग्रीष्मरुतु
मासोत्तममासे वैशाखमासे कृष्णपक्षे त्रयोदशायो प्रथमप्रहरे समाप्तः श्रीकृष्णार्पणमस्तु ॥ १८

K K S U LIBRARY
RAMTEK
441 106
M-1695
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=05.10.20 14:45
,TRANSFERRED=2020/10/05 at 14:50:12
,PAGES=34
,TYPE=STD
,NAME=S0003864
,Book Name=M-1695-RASMANJARI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection